# वैश्विक सन्दर्भे वर्तमान भारतीय शिक्षा

**भारती शर्मा, गवेषिका**
शिक्षाशास्त्र विभागः
श्री .ला. ब. शा. रा. स. विश्वविद्यालयः,
नवदेहली–16

## सारांशिका

**अजय्यां च विश्वस्य देहीश शक्तिं सुशिलं जगद्येन नम्रं भवेत्।**
**श्रुतं चौव यत्कण्टकाकीर्ण मार्गं स्वयं स्वीकृतं नः सुगं कारयेत्।।**

निखिलविश्वे 'जगद्गुरु' इत्युपाधिना विभूषयतः भारतवर्षस्य शिक्षाव्यवस्थायाः गुणवत्ता न केवलं देशेऽपितु समग्रेऽपिविश्वे विश्रुता आसीत्, यस्याः मूलाधारः चरित्रनिर्माणम्, आध्यात्मिकज्ञानं व्यक्तेश्च सर्वांगींणविकासः आसीत्। अतः भारतं प्रारम्भादेव विश्वगुरुः वर्तते। विविधविषयविशेषज्ञानां कारणात् तक्षशिलाविश्वविद्यालयः अग्रणी आसीत्। तक्षशिलाविश्वविद्यालयः प्राथमिकशिक्षाया आरभ्य उच्चशिक्षापर्यन्तं अर्वाचीनव्यवस्था गौरवमयीपरम्परायाः रक्षणे सफलः वर्तते। परन्तु वर्तमाने शिक्षायां वैश्विकस्तरे स्वस्थानं स्थातुं प्रयासरतः। एतत्तु सर्वविदितं यत् शिक्षा कस्यचिदपि देशस्य विकासस्याधारस्तम्भं निर्माति। पुनः नालन्दा, पाटलीपुत्र सदृशाः विश्वविद्यालयाः भारतस्योन्नतायाः वैचरिकतायाः यशोगानं कुर्वन्ति स्मद्य आधुनिकभारतमपि स्वकीयशिक्षा व्यवस्थात्वात् वैश्विकपटले सुदृढा स्थतिर्भवतु उच्चशिक्षा वा, तस्योद्देश्यं देशाय समाजाय चोत्तमः नागरिकनिर्माणं वर्तते। शिक्षायां विश्वस्तरे देशम् उच्चश्रेण्यां प्रवर्धयितुं शक्नुयात्द्य एतदर्थम् शिक्षाप्राप्त्यर्थम् संविधाने मौलिक–अधिकाराः प्राप्ताः। सर्वेभ्यनागरिकेभ्यः उत्तमशिक्षायाः व्यवस्थापनं केन्द्रसर्वकारस्य राज्यसर्वकाराणां च प्राथमिकता वर्तते, सयुंक्तराष्ट्रसंघेऽजस्रं शिक्षायाः सम्बंधितानि विश्वस्तरियानि सम्मेलनानि आयोज्यन्ते।

**मुख्य शब्द** : वैश्विकशिक्षायाः, समग्रेऽपिविश्वे, चरित्रानिर्माणाम्, सर्वांगीणाविकासः, वर्तमानभारतस्य।

**विषय प्रवेश :**

**वर्तमानभारतस्य वैश्विकस्तरे शैक्षिकस्थिति : सयुंक्तराष्ट्र विकासकार्यक्रमेण** (UNDP) **2020** टोक्यो मध्ये निर्गतायामधिसूचनायाम् उक्तः– भारते विद्यालयीय–शिक्षायाः मध्यमानं 11.7 वर्तते। परन्तु विश्वस्य मध्यमानं 12.2 वर्ततें द्य अतः भारतेन क्षेत्रेऽस्मिन् उत्तम प्रदर्शनं कृतम्।

**२०१८ तमेवर्षे वैश्विकशिक्षायाः अधिसूचनानुसारं** : शिक्षाक्षेत्रे उत्कृष्टतायां भारतं 127 देशानां सूच्यां 106 तमे स्थाने आसीत्द्य

न्यूयार्कस्य (P-E-U) शोधकेन्द्रद्वारा विश्वस्य 90 तः अधिकदेशेषुविद्यालयीयशिक्षामानकानां तुलनात्मकम् अध्ययनं 'विश्वे धर्मः शिक्षा च' इति नाम्ना कृतं यत् प्रमुखधर्माणां मध्ये शैक्षिकोपलब्धौ केन्द्रितम् आसीत्।

भारते सर्वाधिकं निरक्षरं जनसंख्या वर्तते, संपूर्णविश्वे निरक्षराणां कुलजनसंख्यायां भारतस्य योगदानं प्रायशः 34ः वर्तते। भारतं विश्वस्य सर्वाधिकगत्या दशसु वर्धमानास्वर्थव्यवस्थासु अन्यतमम्, परं विश्वस्य तृतीयांश निरक्षरजनाः निवसन्त्यत्र। भारतीयविद्यालयीयशैक्षणिकव्यवस्थायै अंतर्राष्ट्रीयस्तरे निम्नतमं स्थानं प्रदत्तम।

अपरतः इसाईधर्मे विद्यालयीयवर्ष 9.3 वर्षः, बौद्धधर्मे च 7.9 वर्षः विद्यतेद्य परन्तु मुस्लिमहिन्दूधर्मयो : मध्यमानं विद्यालयीयवर्षः 5.6 वर्तते इति। यद्धि वैश्विक मध्यमानात् 7.7 वर्षात् अतिन्यूनमस्ति।

**'पीसा (PISA)'** इति यूरोपमध्ये स्वीकृतः मापः मानकम् ,येन भारतीयविद्यालयानां गुणवत्ता का अधीताद्य अनेन 110 देशेषु कृताध्ययने भारताय अधष्टात् द्वितीयं स्थानं प्रदत्तम्द्य

**'यूनेस्को'** द्वारा अद्यतनीया **'वैश्विकपर्यवेक्षणाधिसूचना 2020'** निर्गता। यस्यान्तर्गतं 'कोरोनावायरस' इति वैश्विक व्याधिनां संपूर्णेऽपि विश्वे शिक्षाप्रणालीसु असमानताः वर्धिताद्य सुचनायामेतदपि उक्तं यत् अप्रेल 2020 तमे वर्षे विद्यालयानां विहितावसरे समग्रे देशे प्रायशः 91ः विद्यार्थिनःविद्यालयेभ्यः बहिष्कृताःद्य अतः तेषां शिक्षा प्रभाविताद्यएतदतिरिच्याधिगम–अक्षमतायुतविद्यार्थिभिः अधिगम अक्षमताया (ऑटिज्म स्पेक्ट्रम) संगणकस्य समक्षे स्वतन्त्ररूपेण संघर्षः कृतः तथा च ये निर्धन छात्राः निःशुल्कभोजनाय, निःशुल्कसेनिटरीनेपकिन इत्यर्थं विद्यालयेषु निर्भराः, तेऽपि आषेधकाले (लॉकडाउन) मध्ये असहायाः सञ्जाताः।

चतुर्षु दशकेषु एवं प्रथमवारमेवाभूत यदा विश्वबैंक द्वारा स्वकीयवार्षिकविकाससूचनायां शिक्षायाः चर्चा कृता।

**'विश्वविकासाधिसूचना 2018ः' विश्वबैंक द्वारा अद्यतनीयायाः निर्गतविश्वविकासाधिसूचनायाः अनुसारं भारतीयविद्यालयेषु विद्यार्थिनां स्थतिः**– कञ्चिदपि वंशं समाजं, सजगं, सतर्कं जिज्ञासुं क्रियाशीलं च कर्तुं (निर्मातुं) सर्वाधिकमुपयुक्तः कालः प्रारम्भिकायुवर्गस्य संवेदनशीलवर्षाणि भवन्ति।

**'वैश्विकसूचना 2012' इत्यनुसारं** – विश्वस्तरे विद्यालयीय शिक्षायां प्रथमे स्थाने फिनलैण्ड देशः तथा च एकादशे स्थाने भारतं वर्तते। वर्तमानकाले भारतस्य विद्यालयीय स्थत्यनुसारंप्रायशः 1.508 कोटिः विद्यालयाःसन्ति। एतेषु प्रायशः 97 लक्षं अध्यापकाः सन्ति। 26.5 कोटिः छात्राः विद्यालयेषु सन्ति, येषु 1.87 कोटिः अर्थात 62 प्रतिशतं छात्राः प्रारंभिकविद्यालयेषु सन्ति। सामान्यतः अनुमानमिदं यत् प्रायःनियुताधिकम् अध्यापकानां पदानि रिक्तानि सन्ति। विद्यालयीयशिक्षायां महती कचित् अप्छुति यत् वर्षादनन्तरं 2006 पञ्चदशवर्षेषु सर्वकारीयविद्यालयेषु पञ्चदशप्रतिशतं नामांकनसङ्ख्यायां वृद्धिः भवितव्याऽऽसीत् द्यअतः एतेषां विद्यालयानां श्रेयः स्वीकार्यतां च वर्धितुं राष्ट्रीयस्तरे प्रयासाः कर्तव्याः।

जापानजर्मनीसदृशदेशाः द्वितीयविश्वयुद्धे भीषणविभीषिकायाः अपमानित स्थितेश्च स्वकीय भावीपीढी( वंश) सम्मक्तया निर्माय्यैव अद्यतनीय स्थितौ प्राप्तवन्तः। अपरतः प्राथमिकस्तरे शिक्षा प्रदाने दीर्घतमः देशः भारतमेव । तथा च 2012 तमे वर्षे भारते 313 अंतर्राष्ट्रीयविद्यालयाः आसन्, एतेषु 1.52 लक्षं विद्यार्थिनः पठन्ति स्मःद्यवर्तमाने संख्येयं वर्धित्वा 708 सञ्जाता येषु 3.73 लक्षं विद्यार्थिनः पठन्ति। अद्य पश्चादर्ति क्षेत्रेषु अतिपश्चाद्वर्तिक्षेत्रेषु चाधिकांशविद्यार्थिनः सुदृढतया प्राथमिकशिक्षां गृह्णिन्त। शिक्षायाऽनया तेषां व्यक्तिगतकौशलस्य, अधिगमक्षमतायाः, भाषागतयोग्यतायाः, परिष्कृरचनात्मकतायाश्चेत्यादीनां विकासो भवति।

**वैश्विकस्तरे भारतस्योच्च शिक्षायाः स्थति** : उच्चशिक्षायाः **'अखिलभारतीयसर्वेक्षणम्–2021'** इत्यानुसारं भारते प्रायः 907 विश्वविद्यालयाः 50,000 उच्चशिक्षणसस्थानानि च सन्ति, येषु 3.3 कोटिः छात्राःनामाङ्किताः सन्ति। भारतीया उच्चशिक्षाप्रणाली अमेरिकाचीनदेशयोः परं तृतीय सर्वोत्तमा दीर्घतमा उच्च शिक्षाप्रणाली वर्तते द्यवर्तमान काले भारते79 सहस्रं वैदेशिक छात्राः पठन्ति। 70 लक्षं भारतीय छात्राः विदेशेषु पठन्ति। भारतस्य समग्रे विश्वे उच्चशिक्षाव्यवस्थायां द्वितीयं स्थानं वर्तते , तथापि प्रायशः 907 विश्वविद्यालयेषु 40000 तः अधिक महाविद्यालयेषु एकोऽपि तादृशः विश्वविद्यालयः महाविद्यालयो वा नास्ति यः वैश्विकविश्वद्यालयश्रेणीनिर्धारणे स्थानं प्राप्तुं शक्नुयात्। उच्चशिक्षायां सकल– घरेलु–उत्पादस्य केवलं 1.2 प्रतिशतमेव व्ययः क्रियते।

**'ग्लोबल टेलेंट कॉम्पिटिटिव इडेक्स'** इत्यस्य 132 देशेषु भारतं 72 तमे स्थाने वर्तते। एवं विधनिम्नस्तरीय श्रेणीस्थान्त्वात् अस्माकं देशः पुनः विश्वगुरुत्वं कथं प्राप्स्यति ? इति विचारणीयः प्रश्नः। इदानीमेव निर्गतायाः 'वर्ल्ड युनिवर्सिटी रैंकिंग' इत्यानुसारं विश्वे आहत्य 500 विश्वविद्यालयेभ्यः स्थानं प्रदत्तम्द्य यस्मिन् 300 सर्वोत्तमविश्वविद्यालयेष्वपि भारतस्य एकोऽपि विश्वविद्यालय स्थानं नैव प्राप्तवान। परन्तु भारतस्य सर्वोत्तमपञ्चसंस्थानानि (500) वैश्विकसर्वोत्तमविश्वविद्यालयषु स्थानमलभन्त।

**भारतस्य सर्वोत्तमपञ्चसंस्थानानि** :– 1.– इंडियन इंस्टीट्यूट ऑफ साइंस (IISc), बंगलुरु–, 2रोपड़ 3 इंदौर 4 बाम्बे 5 देहली द्यपुनः पर्यायेऽस्मिन् संख्येयम् वर्धित्वा ०६ अभवत्। श्रेणीकरणमिदं 'टाइम्स हायर एजुकेशन' ० द्वारा कृतम– कस्यचिद्देशस्याधिकाधिकं विश्वविद्यालयश्रेणीकरणे स्थानं प्राप्तकर्तृसु देशेषु भारतं पञ्चमे स्थाने वर्तते।

विश्वस्तरे सर्वोत्तमविश्वविद्यालयश्रेणीसुधारार्थं भारत सर्वकारः बहु प्रयासरतः। प्रयासेऽस्मिन राष्ट्रीयशिक्षानितिः 2020 अत्यन्तं महत्वपूर्णा सहायिका च भविष्यति। नीतेरस्याः अनुसारं देशेऽनुसन्धानस्य वित्तपोषणार्थं, समन्वयार्थं, संवर्धनार्थं 'राष्ट्रीयअनुसन्धान–फाउनडेशन' इत्यस्य स्थापना करिष्यते।

असोसिएशन ऑफ इंडियन यूनिवर्सिटी इत्यानुसारं–भारतस्य पार्श्वेऽतर्राष्ट्रीयछात्रान् आकर्ष्टुं शिक्षयितुं च अत्यधिकं क्षमता संभावना च वर्ततेद्य वैदेशिकछात्रान् आकर्ष्टुं 'स्टडी इन इंडिया' इति नूतनः कश्चन कार्यक्रमोऽपि सञ्चाल्यतेद्य राष्ट्रियशिक्षानीतीः–2019 एतस्याः प्रारुपस्य माध्यमेन उच्चशिक्षायाः अंतर्राष्ट्रीयकरणे बलं दीयतेद्य प्रारूपोऽयं भारतीयविश्विद्यालयानां अंतर्राष्ट्रीयस्तरे वर्धयर्थं भारतीयभाषासु, कलायां, इतिहासे, आयुर्वेदे,योगदिषु च विशेष रूपेण सज्जपाठ्यक्रमानां क्रियान्वयनस्य निवेदनं करोति, तेन भारतंमुच्चशिक्षायाः आकर्षणकेन्द्रं भवितुं शक्नुयात्।

देशस्य संस्थानानां 6 विश्वस्य श्रेष्ठसंस्थानां सूच्यां स्थानाभावात् समितिः उच्चशिक्षायाः स्तरं सुधारनार्थं प्रपरामर्शमददत् यत् विदेशस्योच्चगुणवत्तापरकशीर्षस्थेषु 200 संस्थाननि भारते आगन्तुमनुमतिः दातव्याद्य परन्तु एतादृशसंस्थानैभ्यः उचित नियन्त्रणेन सह अनुमतिः प्रदातव्या भारतीयविश्विद्यालयानाम् अन्तराष्ट्रीय श्रेणीं वर्धितुं तांश्च विश्वस्तरीयं स्थातुं दृढप्रयासाः करिष्यन्तेद्य परन्तु एतदर्थं मुख्यरुपे वैश्विक प्रतियोगितायाः मध्ये उच्चस्तरीयनिवेशस्य आवश्यकता वर्तते।

तक्षशिला, नालंदा, विक्रमशिला और वल्लभी सदृशैः च भारतस्य विश्वस्तरीयसंस्थानैः अध्ययनस्य विविधक्षेत्रेषु शिक्षणशोधयोः उच्च प्रतिमानानि स्थापितानि द्य अनयैव शिक्षाव्यस्थया सम्पूर्णविश्वे पाणिनिः, पतंजलिः, मैत्रेयी, गार्गी चरकः,सुश्रुतः,आर्यभट्टः, वराहमिहिरः,चाणक्यः,चक्रपाणिश्च इत्यादयः विद्वान्सोऽजायन्त द्य

वैज्ञानिकाश्चकपिलाः कणादःसुश्रुतस्था।

चरकोभास्कराचार्यः वराहः मिहिरः सुधि।

नागर्जुनौभरद्वाजो आर्यभट्टो वसुबुर्धोः,।

ध्येयो वैयंकटरामश्च विज्ञारामानुजादयः।।

यैः खलु वैश्विकस्तरे शिक्षायाः विविधक्षेत्रेषु प्रमाणिकत्वेन मौलिकं योगदानं प्रदत्तम्द्य वर्तमानेऽपि वैश्विक महत्वस्य परम्परामिमाम्

अग्रिमपीढ्यै सध्यानमीक्षणस्यावश्यक्ता वर्तते।

भारतस्य शिक्षा प्रणालीं प्राचीनसमय इव विश्वस्तरीयं कर्तुम् आवश्यकता वर्तते यत् शिक्षण–प्रक्रिया छात्र– केन्द्रिता स्यात् द्यजिज्ञासा, अन्वेषण, अनुभवशीला, नमनीया , रुचिपूर्णा च स्यात्। शिक्षार्थिनः जीवनस्य सर्वेषां पक्षाणां विकासं कृत्वा परिवारिकस्तरे, समाजिकस्तरे, राष्ट्रियस्तरे विश्वस्तरे च साफल्यं प्राप्तुं शक्नुयु।

**नूतना शिक्षा नीतिः 2020** , एकविंशतितमीशताब्धाः प्रथमा शिक्षा नीतिः। यस्याः अनुसारं 2040 वर्षपर्यन्तं भारतं कस्माचिदपि देशात् पृष्ठे न भवेत् , शिक्षापप्रणाली सर्वोच्चगुणवत्तायुक्ता स्यात् एतादृशी काचित् शिक्षाव्यवस्था (प्रणाली) भवेत्। भारतवर्षे उच्चशिक्षायाः गुणवत्तायैः राष्ट्रीय शिक्षा नीतिः–2020 भारतीयतायाःप्रलेखोवर्तते। अस्मिन् शिक्षाक्षेत्रे आमूल–चूलपरिवर्तनानि कृतानि। नैतिकतायाः, मानवीय मूल्यानां, भारतीयसंस्कृतेः आत्मनिर्भरतायाश्च आधारशिलायां निर्मितायां नीतावस्यां विद्यार्थीनं विश्वमानवं भारततञ्च विश्वगुरुं निर्मातुं संकल्पना निहिताऽस्ति। भारतं ज्ञानरूपे एवं प्रकारेण विकसितं करिष्यते यत् समग्रजगतोऽपि विद्यार्थीनोऽत्र ज्ञानार्जनाय आगमिष्यन्ति। भारतीयभाषाणां संरक्षणं विद्यार्थीनां च समयस्य सदुपयोगः नीतेरस्याः कतिपयाः विशेषताः सन्ति। एतस्याः विश्वस्तरेऽपि प्रशंसा भवति।

भारतस्य शिक्षाव्यवस्थां सुदृढं कर्तुं विश्वस्तरे च अस्माकं देशस्य विश्वविद्यालयानां श्रेणी सुधाराय सर्वकारेण तु विविधाः योजनाः नीतयश्चायोज्यन्ते परन्तु तत्सर्वं तदनीमेव सफल्यं प्राप्स्यति यदा विद्यार्थिनः,शिक्षकगणः, अधिकारीगणश्च स्व–स्वकर्तव्यानि पूर्ण निष्ठया ,परिश्रमेण सत्यनिष्ठया च वोढुं शक्ष्यन्ति द्यतदानिमेव अस्माकं देशस्य शैक्षिकस्तरः विश्वपटले सुदृढं कर्तुं शक्यतेऽस्माभिः।

**संदर्भग्रन्थ सूची :**


1. ग्लोबल एजुकेशन मानिटरिंग रिपोर्ट २०१६ पृ.सं.78–101
2. अन्तराष्ट्रीय समसमायिकी २६ जून २०२० पृ.सं.110–121
3. वैश्विक शिक्षा निगरानी रिपोर्ट २०२० पृ.सं.27–39
4. राष्ट्रिय शिक्षा नीति २०२० पृ.सं.६७–११६
5. महामारी का शिक्षा पर गंभीर वैश्विक प्रभाव रिपोर्ट २०२१ पृ.सं. ४६–५७।